झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद राँची झारखण्ड

वार्षिक परीक्षा -2022-23

आदर्श-प्रश्नपत्र (वस्तुनिष्ठ)

कक्षा -अष्टमी विषय- संस्कृत

पूर्णांक- 50

........................................................................................

सामान्य-निर्देशा: -

- प्रश्नानाम् संख्या -50 (पञ्चाशत्) सन्ति ।
- सर्वे प्रश्नाः अनिवार्याः ।
- प्रत्येक-प्रश्नानां चत्वारः विकल्पा:सन्ति। उचितं विकल्पं चिनुत ।
- प्रत्येक-प्रश्नस्य कृते अंकमेकं निर्धारितम्।

**खण्ड- क पठितावबोधनम्**

**अधोलिखितम् गद्यांशं, पद्यं नाट्यांशं च पठित्वा प्रदत्तान् प्रश्नान् निर्देशानुसारम् उत्तरत-**

**गद्यांशं**

अस्माकं झारखण्डप्रदेशे एकं महत्त्वपूर्णं पर्व 'मण्डा' इति अस्ति। अस्मिन् पर्वणि जनाः विविधरूपैः शिवम् आराधयन्ति।'मण्डा' इति उत्सवः वैशाखमासस्य शुक्लपक्षस्याक्षयतृतीयातः प्रारभ्यते। चतुर्दिवसपर्यन्तम् एनं उत्सवं झारखण्डप्रदेशस्य जनजातयः सदानाः च समानरूपेण मिलित्वा आयोजयन्ति ।

**प्रश्नाः**

1 **'मण्डा'** कस्य प्रदेशस्य पर्व अस्ति ?

(क) बिहारस्य (ग) झारखण्डप्रदेशस्य
(ख) असमस्य (घ) कर्नाटकस्य

2 कस्मिन् पर्वणि जनाः शिवम् आराधयन्ति ?

(क) मण्डापर्वणि (ग) सरहुलपर्वणि
(ख) कर्मापर्वणि (घ) छठपर्वणि

3 **'मण्डा'** कस्मिन् मासे भवति ?

(क) चैत्रमासे (ग) ज्येष्ठमासे
(ख) वैशाखमासे (घ) श्रावणमासे

4 **'अस्मिन्'** पदे का विभक्तिः ?

Jharworld.com

(क) तृतीया (ग) पञ्चमी

(ख) चतुर्थी (घ) सप्तमी

5 '**शुक्लपक्षः**' अस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

(क) कृष्णपक्षः (ग) गुरुपक्षः

(ख) बुद्धपक्षः (घ) शुक्रपक्षः

**<u>पद्यम्</u>**

**श्रोत्रं श्रुतेन न तु कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।**

**विभाति कायः करूणामयानां परोपकारैः न तु चन्दनेन।।**

6 दानेन कस्य शोभा भवति ?

(क) पाणेः (ग) कुण्डलस्य

(ख) कङ्कणस्य (घ) चन्दनस्य

7 कायः केषां विभाति ?

(क) करूणामयानां (ग) समृद्धानां

(ख) निर्धनानां (घ) चौराणां

8 करूणामयानां कायः केन विभाति ?

(क) तापेन (ग) जलेन

(ख) चन्दनेन (घ) परोपकारेण

9 '**कर्णः**' अस्य पर्यायपदम् अत्र किं प्रयुक्तम् ?

(क) नेत्रम् (ग) श्रोत्रम्

(ख) आननम् (घ) मुखम

10 '**विभाति**' पदे कः लकारः ?

(क) लट् (ग) लङ्

(ख) लृट् (घ) लोट्

**<u>नाट्यांशम्/संवादम्</u>**

**आदर्श: -** मात: ! आनयतु स्मृतिम् अस्मिन् मण्डपे ।अहं तया सह विवाहं करिष्यामि।

**धनेश्वर**: - पुत्र! किं वदसि ? किं तव मति: भ्रष्टा जाता ? मम विरोधं करोषि ?

Jharworld.com

**आदर्श:** - हे पित:! भवान् मम पूजनीयः। अहं भवतः विरूद्धं कदापि न गमिष्यामि। स्मृति: एव मत्कृते अनुकूला भार्या अस्ति। अतएव अहम् अनया सह एव विवाहं करिष्यामि।

11 'हे पितः!' कः वदति ?

(क) आदर्शः (ग) संघर्षः
(ख) उत्कर्षः (घ) हर्षः

12 कः सर्वदा पूजनीयः भवति ?

(क) पिता (ग) खगः
(ख) शत्रु (घ) अश्वः

13 आदर्शः कया सह विवाहं करोति ?

(क) सीतया सह (ग) स्मृत्या सह
(ख) शीलया सह (घ) लतया सह

14 '**गमिष्यामि'** पदे कः लकारः ?

(क) लङ् (ग) लोट्
(ख) लट् (घ) लृट्

15 ,अहम् अनया सह एव विवाहं करिष्यामि।' इत्यस्मिन् अव्वयपदं चित्वा लिखत -

(क) अहम् (ग) एव
(ख) अनया (घ) विवाहं

**पाठेभ्यः प्रश्नाः**

16 मेघः कदा वर्षति ?

(क) शरदि (ग) ग्रीष्मे

(ख) वसन्तसमये (घ) वर्षासु

17 नदी विश्वं कीदृशी पालयति ?

(क) माता इव (ग) पिता इव

(ख) सखा इव (घ) धरा इव

18 वयं कुत्र वायुविहारं करवाम?

(क) गगने (ग) भूतले
(ख) सागरे (घ) तडागे

Jharworld.com

19 विवेकानन्दस्य जन्म कुत्र अभवत् ?

(क) कोलकतानगरे (ग) चेन्नईनगरे

(ख) पटनानगरे (घ) राँचीनगरे

20 'ग्रामात् बहिः सरोवरः आसीत् |' इत्यस्मिन् अव्ययपदं चित्वा लिखत -

(क) सरोवरः (ग) हंसः

(ख) बहिः (घ) ग्रामात्

21 विश्वधर्मसम्मेलनं कुत्र अभवत् ?

(क) जर्मनीदेशे (ग) जापानदेशे

(ख) भारतदेशे (घ) अमेरिकादेशे

22 मनुष्यः नेत्राभ्यां किं करोति ?

(क) पश्यति (ग) खादति

(ख) पिबति (घ) वदति

23 आदर्शः कस्य पुत्रः आसीत् ?

(क) धनेश्वरस्य (ग) धनराजस्य

(ख) धनपालस्य (घ) धर्मराजस्य

24 नरः किं हित्वा प्रियो भवति ?

(क) कामं (ग) मानं

(ख) क्रोधं (घ) लोभं

25 गंगा किं करोति ?

(क) दानं ददाति (ग) पापं नाशयति

(ख) जलं ददाति (घ) तापं ददाति

**खण्ड -ख - अपठितावबोधनम्**

**निर्देशः - अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरत-**

भारते अनेके महापुरुषाः अभवन्। महर्षिः दयानन्दः तेषु प्रमुखः। तस्मिन् काले अनेकाः कुरीतयः प्रचलिताः आसन्। अन्धविश्वास: स्त्रीशिक्षा बालविवाहः जातिप्रथा इत्यादयः। एताः सर्वाः निवारयन् वेदधर्म च प्रचारयन् महर्षिः भारते सर्वत्र अभ्रमत्।

Jharworld.com

26 भारते के अभवन् ?

(क) महाशत्रवः (ग) महापुरुषाः

(ख) महावञ्चकाः (घ) महाव्रताः

27 महर्षिः दयानन्दः कस्य प्रचारयति स्म ?

(क) वेदधर्मस्य (ग) कालधर्मस्य

(ख) राजधर्मस्य (घ) सर्वधर्मस्य

28 महर्षिः दयानन्दः कुत्र अभ्रमत् ?

(क) भारतदेशे (ग) भूटानदेशे

(ख) जापानदेशे (घ) नेपालदेशे

29 '**तेषु**' पदे का विभक्तिः ?

(क) प्रथमा (ग) पञ्चमी

(ख) तृतीया (घ) सप्तमी

30 '**अनेके महापुरुषाः**' अत्र विशेषणपदं किम् ?

(क) महापुरुषाः (ग) अनेके

(ख) पुरुषाः (घ) महा

**<u>खण्ड - ग - व्याकरणम्</u>**

31 मम शरीरे .......हस्तौ स्तः। रिक्तस्थानं उचितपदेन पूरयत -

(क) द्वौ (ग) द्वे

(ख) द्वाभ्याम् (घ) द्वयोः

**<u>रेखांकितपदानि आधृत्य प्रश्नवाक्यानि लिखत-</u>**

32 सर्वे **<u>संस्कृतस्य</u>** महत्त्वं जानन्ति ?

(क) केन (ग) कस्मै

(ख) कस्मात् (घ) कस्य

33 **<u>शिवभक्ताः</u>** पूर्णास्थायाःपरिचयं अनुष्ठाने दर्शयन्ति ?

(क) कः (ग) कौ

(ख) के (घ) कुत्र

Jharworld.com

34 '**अलसस्य**' पदे का विभक्तिः प्रयुक्ता ?

(क) प्रथमा (ग) पञ्चमी

(ख) षष्ठी (घ) सप्तमी

35 '**संतोषात्**' पदे का विभक्ति: प्रयुक्ता ?

(क) प्रथमा (ग) तृतीया

(ख) पञ्चमी (घ) सप्तमी

36 **पृथिव्याः'** पदस्य समानार्थकं पदं चिनुत-

(क) वसुन्धरायाः (ग) यशोधरायाः

(ख) सुभद्रायाः (घ) कन्यायाः

37 '**पूर्वार्द्धः**' पदस्य विलोमपदं चिनुत -

(क) श्राद्धः (ग) परार्द्धः

(ख) क्रुद्धः (घ) शुद्धः

38 अहं नासिकया **जिघ्रामि**।अत्र कः लकारः ?

(क) लोट् (ग) लृट्

(ख) लट् (घ) विधिलिङ्गः

39 नवीनः कर्णेन बधिरः।अत्र '**कर्णेन**' पदे का विभक्ति:?

(क) तृतीया (ग) चतुर्थी

(ख) षष्ठी (घ) सप्तमी

40 '**खनित्वा**' अत्र कः प्रत्ययः प्रयुक्तः ?

(क) क्त्वा (ग) ल्यप्

(ख) तव्यत् (घ) तव्य

41 अशुद्धं पदं चिनुत-

(क) भ्रमति (ग) खेलति

(ख) व्रजति (घ) आगमति

42 **विहस्य'** पदे कः प्रत्ययः प्रयुक्तः?

Jharworld.com

(क) क्त्वा (ग) ण्यत्

(ख) क्यप् (घ) ल्यप्

43 **करणीयम्'** पदे कः प्रत्ययः प्रयुक्तः?

(क) अनीयम् (ग) अनीयर्

(ख) केलिमर् (घ) तव्यत्

44 **अनुभवति'** पदे कः उपसर्गः ?

(क) अप (ग) अति

(ख) अनु (घ) उप

45 '**देवार्चनम्'** पदस्य संधिविच्छेदं कुरुत-

(क) देव +आर्चनम् (ग) देवा+अर्चनम्

(ख) देव+अर्चनम् (घ) देव+ अचनम

46 **शिवाय'** पदे का विभक्तिः ?

(क) तृतीया (ग) चतुर्थी

(ख) पञ्चमी (घ) षष्ठी

47 '**वसतु'** पदे कः लकारः अस्ति ?

(क) लट् (ग) लोट्

(ख) लङ् (घ) लृट्

48 **'दुर्बलः'** पदे कः उपसर्गः ?

(क) दुर् (ग) दूर्

(ख) दु (घ) दुर्ब

49 अहं विद्यालयं.........। रिक्तस्थानं पूरयत -

(क) गच्छामः (ग) गच्छति

(ख) गच्छसि (घ) गच्छामि

50 '**66'** इति अंकस्य कृते संस्कृतपदं लिखत -

(क) षोडशः (ग) षष्टिः

Jharworld.com

(ख) षड्षष्टिः (घ) सप्तषष्टिः

..........................................................................

Jharworld.com